# Shri Panduranga Suprabhatam

# શ્રીપાણ્ડુરઙ્ગસુપ્રભાતંમ્

## Document Information

Text title : Panduranga Suprabhatam

File name : pANDurangasuprabhAtam.itx

Category : vishhnu, suprabhAta

Location : doc_vishhnu

Author : Shri Chandrashekaramaharaja Deglurkar

Transliterated by : NA

Proofread by : NA

Acknowledge-Permission: Amit S Nagare Sanskrit Amod

Latest update : April 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 22, 2023

*sanskritdocuments.org*

Shri Panduranga Suprabhatam

# શ્રીપાણ્ડુરઙ્ગસુપ્રભાતંમ્

ઉત્તિષ્ઠ પાણ્ડુરઙ્ગેશ ઉત્તિષ્ઠ રુક્મિણીપ્રિય ।
ઉત્તિષ્ઠોત્તિષ્ઠ સર્વેશ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ નન્દાનન્દવિવર્ધન ।
ઉત્તિષ્ઠ પણ્ઢરીનાથ ભક્તકાર્યં સમાચર ॥ ૨॥

માતઃ પયોધિતનયે જગદાદિભૂતે
    બ્રહ્માદિદેવજનનિ શ્રિતદુઃખહન્ત્રિ ।
શ્રીકૃષ્ણનાથપદપઙ્કજદાસ્યનિષ્ઠે
    શ્રીપાણ્ડુરઙ્ગદયિતે તવ સુપ્રભાતમ્ ॥ ૩॥

સૌન્દર્ય-માર્દવ-કૃપાદિ-ગુણાલયે ચ
    માતઃ સ્વભક્તજનકલ્પલતે પ્રસન્ને ।
શ્રીરુક્મિણીતિવિદિતે હરિલગ્નચિત્તે
    શ્રીપાણ્ડુરઙ્ગદયિતે તવ સુપ્રભાતમ્ ॥ ૪॥

વિઘ્નેશ-સૂર્ય-શિવ-શક્તિ-ધનાધિપેશ
    વાગીશ-વાયુ-વિબુધેશ-મરુદ્ગણાદ્યાઃ ।
ત્વદ્દ્વારિબદ્ધકરસમ્પુટતઃ પઠન્તિ
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૫॥

નારાયણાઙ્ઘ્રિસરસીરુહજા-સુનીલા-
    ગોદાવરી-શરયુ-ભીમસમુદ્ભવાઙ્ગાઃ ।
નદ્યઃ પ્રસન્નસલિલા જગદુઃ પ્રભાતે
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૬॥

પ્રહ્લાદ-નારદ-શુકાર્જન-પુણ્ડરીક
    વ્યાસામ્બરીષ-બલિ-શૌનક ભીષ્મમુખ્યાઃ ।
ત્વત્પાદપદ્મ-મકરન્દ-રસાનુસક્તાઃ

શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૭॥

કૂજન્તિ કોકિલમિષેણ મુદાત્ર સિદ્ધાઃ
નૃત્યચ્છિખણ્ડિમિષતો મુદમાવહન્તિ ।
ગુઞ્જારવેણ મધુપાઃ પદપઙ્કજરક્તાઃ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૮॥

ત્વદ્ધામ્ય-પાર્શ્વગત-ગોપિગણાઙ્ગનસ્થા
ગાઢાનુરાગભરતો બત મુક્તકેશી ।
સદ્મસ્થિતાશ્ચ મૃદુ કેલિશુકાઃ પઠન્તિ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૯॥

ત્વત્સઙ્ગિસઙ્ગિજનસઙ્ગ-મનીષયા ચ
ત્વત્પાદધૂલિકણમજ્જનલબ્ધુકામાઃ ।
દેવાસ્ત્વદત્રનગરે તૃણલોષ્ટદેહાઃ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૦॥

વાય્વગ્નિશક્રવિધિશઙ્કરસોમમુખ્યા
દેવાઃ સસિદ્ધ-ઋષિકિન્નરબન્દિમુખ્યૈઃ ।
ત્વત્ક્ષેત્રવાસસમુપાસનલાલસા વૈ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૧॥

સૌવર્ણપદ્મ-કરવીર-સુપારિજાતાઃ
ખર્જૂર-ચૂત-બદરી-સુકપિત્થવૃક્ષાઃ ।
ત્વાં સ્વીયપુષ્પફલસમ્ભૃતો ઉઅજન્તિ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૨॥

યસ્યાઙ્ઘ્રિકઞ્જયુગસમ્ભવસીધુપાન
પુષ્ટાન્ વિલોક્ય સુજનાન્ વિબુધા લષન્તિ ।
મર્ત્યૈજનુર્નિરતિશાયિ-સુખાપ્તિ-હેતુ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૩॥

પિત્રોશ્ચ સેવનરતં નિજભક્તવર્યં
શ્રીપુણ્ડરીકમનઘં શુભકૃત્તમં તમ્ ।
પુષ્ટ્વા વરૈર્વસસિ દેવ સદાસ્ય ભૂમૌ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૪॥

માણ્ડવ-કણ્વ-ઋભુ-શઙ્ખ-મૃકણ્ડસૂનુ-
વ્યાસાત્રિ-કશ્યપ-વસિષ્ઠ-પરાશરાદ્યાઃ ।
ક્ષેત્રપ્રદક્ષિણકરાઃ પ્રવદન્ત્યુષાયાં
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૫॥

ત્વન્મન્દિરસ્થશિખરાગ્રનિરીક્ષણેન
તત્પ્રાપ્તવારિ-નિકરેષુ સુમજ્જનેન ।
પ્રાપ્તાઃ કૃતાર્થપદવીં સ્તવમુજ્જગન્તિ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૬॥

પદ્મં ચ કુણ્ડલમથાપિ ચ ચન્દ્રભાગા
તીર્થાનિ પાપહરણાનિ સુપુણ્યદાનિ ।
ત્વત્ક્ષેત્રભૂમિમધિગમ્ય રટન્તિ કલ્યે
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૭॥

શ્રીનારદઃ સરસિસમ્ભવજાતજાયા
દુર્ગા ચ વિશ્વજનની ભુવનેશ્વરી ચ ।
ત્વદ્દ્વારદેશમધિકૃત્ય પઠન્ત્યુષસ્સુ
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૮॥

શ્રીપાણ્ડુરઙ્ગ હરવન્દ્ય ત્રિદષ્ટ્રઘાતિન્
શ્રીપુણ્ડરીકમુનિવર્ય-વરપ્રદાયિન્ ।
શ્રીરુક્મિણીશ બલદેવસુપૂજિતાઙ્ઘ્રે
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૯॥

મન્દાતિમન્દમતિપાપરતાલ્પચિત્ત
સંસારસાગરસમુદ્ધરણાવતીર્ણ ।
માયાપતે યદુપતે જગદેકબન્ધો
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૦॥

શ્રીપાણ્ડુરઙ્ગ નિખ્લેશ ધનુર્ધરોઽસિ
ક્ષેત્રં ધનુઃ શરવરસ્તવ ચન્દ્રભાગા ।
લક્ષ્યં સમસ્તશમલં નિજબોધનાશ્યં
શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૧॥

ઉત્કર્ષિની ચ વિમલા ચ ક્રિયાઽથ જ્ઞાના-
યોગા તથા વિતથતાઽનુગ્રહેશના ચ ।

પ્રહ્લીતિશક્તિનવકં ગિરતિ સ્તવં તે
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૨॥

શ્રીપુણ્ડરીકમુનિદત્તમૃદાસને તે
    પાદારવિન્દયુગલં સમમેવ નાથ ।
નાસાગ્રદૃષ્ટિ-કટિહસ્તતયા સ્થિતોઽસિ
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૩॥

શ્રીવત્સસન્મકરકુણ્ડલકૌસ્તુભાશ્ચ
    પીતામ્બરં તુલસિદામ દરોથ પદ્મમ્ ।
એતાનિ ભૂષવરાણિ તવાશ્રિતાનિ
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૪॥

આષાઢકાર્તિકસિતે તવ દેવ યાત્રા
    ચૈકાદશીવ્રતમલં હરિનામદ્ઘોષઃ ।
એતૈઃ પ્રસીદસિ સદા ભગવન્ સ્વભક્તાન્
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૫॥

નિર્માણ-રક્ષણ્-વિનાશકરોસ્યથાપિ
    કર્તૃત્વભાવરહિતોઽસિ-સદાવ્યયોઽસિ ।
શ્રીરામકૃષ્ણનરસિંહકૃતાવતાર
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૬॥

શ્રીપૌણ્ડરીકનગરં કિલ ચન્દ્રભાગા
    શ્રીવિષ્ણુપાદ-સુષમા પુલિનં ચ નદ્યાઃ ।
એતત્ત્વદીયવસતેઃ શુભનામશેયં
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૭॥

જ્ઞાનેશ્-નાથ-જગમિત્ર-તુકા-નિળોબા
    નામા-જની-સખુ-મીરાદિ-સમસ્ત-સન્તઃ ।
શ્રીવિઠ્ઠલેશ તવ પાદયુગં પ્રપન્નાઃ
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૮॥

અસ્મત્કુલાગ્રજનનાસ્તવ ભક્તવર્યા
    ગુણ્ડાખ્યસદ્ગુરુવરાશ્ચ તદીય વંશ્યાઃ ।
સર્વે પ્રભાતસમયે પ્રપઠન્તિ નિત્યં
    શ્રીપણ્ઢરીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૯॥

શ્રીપણ્ઢરીપુરપતેરિહ સુપ્રભાતં
    યે શ્રદ્ધયાપ્રતિદિનં મનુજાઃ પઠન્તિ ।
તે પાણ્ડુરઙ્ગકૃપયા હરિપાદપદ્મ-
    ભક્તિં સમાપ્ય નિજબોધયુતા ભવન્તુ ॥ ૩૦॥

તવ વિઠ્ઠલ દસોઽહં ચન્દ્રશેખરનામભાક્ ।
સુપ્રબાતસ્તવં ભક્ત્યા ત્વત્કૃપાર્થં સમર્પયે ॥ ૩૧॥

શ્રી ચન્દ્રશેખરમહારાજ દેગલૂરકરવિરચિતં
    શ્રીપાણ્ડુરઙ્ગસુપ્રભાતં સમ્પૂર્ણમ્ ॥

પુણ્ડલીકવરદા હરિ વિઠ્ઠલ ।
શ્રીજ્ઞાનદેવ-તુકારામ ।
સદ્ગુરુ ગુણ્ડમાહારાજ કી જય ।
સદ્ગુરુ હરિમાહારાજ કી જય ।

*Shri Panduranga Suprabhatam*

pdf was typeset on April 22, 2023

Please send corrections to *sanskrit@cheerful.com*